# Chulikopanishad Dipika

# ચૂલિકોપનિષદ્દીપિકા

## Document Information

Text title : chUlikopaniShat

File name : chUlikopaniShat.itx

Category : upanishhat, vyAkhyA

Location : doc_upanishhat

Author : Narayana

Proofread by : KS Sheshadri Sharma

Description-comments : vyAkhyA for mantrikopanishat 32/108; Shuklayajurveda Samanya upanishad

Latest update : September 30, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 7, 2022

*sanskritdocuments.org*

# ચૂલિકોપનિષદ્દીપિકા

ॐ તત્સદ્બ્રહ્મણે નમઃ ।

॥ ચૂલિકોપનિષત્ અથવા મન્ત્રિકોપનિષત્ ॥

(નારાયણવિરચિતદીપિકાસમેતા)

ॐ પૂર્ણમદઃ પૂર્ણમિદં પૂર્ણાત્પૂર્ણમુદચ્યતે ।
પૂર્ણસ્ય પૂર્ણમાદાય પૂર્ણમેવાવશિષ્યતે ॥

ॐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ચૂલિકા ચૂડિકા લોકે સ્તમ્ભાગ્રં તીક્ષ્ણમુચ્યતે ।
તદ્વદ્વેદાન્તભાગોઽયં ચતુષ્ખણ્ડા હિ પઞ્ચમી ॥ ૧॥

યોગફલમાત્મદર્શનં સ ચાઽઽત્માઽતિસન્નિહિતોઽપિ કણ્ઠસ્થહારવત્પરાગ્દૃષ્ટિના ગુરું વિના ન દૃશ્યત ઇતિ તદ્બોધનાર્થમુત્તરો ગ્રન્થસ્તત્ર હારરૂપકેણાઽઽહ–

ॐ અષ્ટપાદં શુચિર્હંસં ત્રિસૂત્રં મણિમવ્યયમ્ ।
દ્વિવર્તમાનં તેજસૈદ્ધં સર્વઃ પશ્યન્ન પશ્યતિ ॥ ૧॥

અષ્ટપાદમિતિ । અષ્ટૌ પ્રકૃતિરૂપાઃ પાદા અવયવા અસ્ય તમષ્ટપાદમ્ ।
તદુક્તમ્– "ભૂમિરાપોઽનલો વાયુઃ ખં મનો બુદ્ધિરેવ ચ ।
અહઙ્કાર ઇતીયં મે ભિન્ના પ્રકૃતિરષ્ટધા" ॥ ઇતિ ।

અસ્યાઃ પાદત્વં સર્વતઃ પ્રાથમ્યસામ્યાત્ । શુચિરુજ્જ્વલઃ । શુચિઃશબ્દઃ સકારાન્તો નપુંસકઃ । શુચિમિતિ વા પાઠઃ । હન્ત્યજ્ઞાનમિતિ હંસસ્તમ્ । ત્રીણિ સૂત્રાણિ ધર્માર્થકામા યસ્ય મોક્ષસ્ય સ્વરૂપાનતિરેકાત્ । ત્રયો ગુણા વા તિસ્રો નાડ્યો વા । મણિં પ્રકાશત્વાત્ । ન વિવિધમેત્યવ્યયમેકરૂપમ્ । દ્વયોઃ સ્થૂલસૂક્ષ્મદેહયોર્વર્તમાનં તિષ્ઠન્તં દ્વિવર્તમાનમ્ । તેજસા પ્રકાશેનેદ્ધં દીપ્તં તેજસૈદ્ધં છાન્દસી વૃદ્ધિઃ । એવંવિધમાત્માનં કણ્ઠસ્થાહારમિવ સર્વો લોકઃ પશ્યન્નપિ ન પશ્યતિ । હારોઽપ્યષ્ટકન્દુકાવયવ ઉજ્જ્વલો હંસલક્ષણોપેતાસ્ત્રિવૃત્સૂત્રો મણિમયો દૃઢો દ્વયોર્દક્ષિણોત્તરભાગયોર્વર્તમાનસ્તેજસા દીપ્તશ્ચ ભવતિ । સર્વો લોકસ્તં પશ્યન્નપ્યતિસાન્નિધ્યાન્ન પશ્યતિ ॥ ૧॥

તર્હિ તદ્દર્શને ક ઉપાય ઇત્યત આહ–

ભૂતસમ્મોહને કાલે ભિન્ને તમસિ વૈશ્વરે ।

અન્તઃ પશ્યતિ સત્ત્વસ્થં નિર્ગુણં ગુણગહ્વરે ॥ ૨॥

ભૂતેતિ । ભૂતમોહજનકે કાલે કૃષ્ણવર્ણે ઐશ્વર ઈશ્વરાધિષ્ઠિતે તમસ્યજ્ઞાને ભિન્ને નષ્ટે સત્યન્તરેવ સન્નિહિતં પશ્યતિ સત્ત્વસ્થં બુદ્ધિસ્થં તત્સાક્ષિણં તત્પ્રકાશ્યં વા । “દૃશ્યતે ત્વગ્ર્યયા બુદ્ધ્યા” ઇતિ શ્રુતેઃ । સ્વયં નિર્ગુણમપિ ગુણકોટરે લિઙ્ગેઽહમિતિ ભાસમાનં મેઘણ્ડલ ઇવ સૂર્યમ્ ॥ ૨॥

અશક્યઃ સોઽન્યથા દ્રષ્ટું ધ્યેયમાનઃ કુમારકઃ ।
વિકારજનનીં માયામષ્ટરૂપામજાં ધ્રુવામ્ ॥ ૩॥

ધ્યાયતેઽધ્યાસિતા તેન તન્યતે પ્રેરિતા પુનઃ ।
સ્તૂયતે પુરુષાર્થં ચ તેનૈવાધિષ્ઠિતા પુરા ॥ ૪॥

સ કુમારકો જરારહિતઃ “ત્વં કુમાર ઉત વા કુમારી” ઇતિ મન્ત્રવર્ણાત્ । અન્યથેશ્વરાનુગ્રહેણ તમોભેદં વિના પ્રકારાન્તરેણ દ્રષ્ટુમશક્યઃ । ધ્યેયમાનો બાહ્યદૃષ્ટ્યા ચિન્ત્યમાનોઽપિ । છાન્દસ એકારઃ । અથવાઽદ્યાપિ ધ્યેયં ચિન્તનીયં વિચાર્યં માનં પ્રમાણમસ્ય દુર્વિજ્ઞેયત્વાત્ । માયાં ધ્યાયતે ચિન્તયતિ જગત્સૃષ્ટ્યર્થં સમ્ભાવયતિ નારીમિવર્તુસ્નાતામ્ ।
તદુક્તમ્–” મમ યોનિર્મહદ્બ્રહ્મ તસ્મિન્ગર્ભં દધામ્યહમ્ ।
સમ્ભવઃ સર્વભૂતાનાં તતો ભવતિ ભારત “॥ ઇતિ ।
તેનાધ્યાસિતાઽઽક્રાન્તાઽઽરૂઢા પ્રેરિતા ચ સતી તન્યતે સ્વયમેવ કાર્યરૂપેણ તતા ભવતિ । કર્મકર્તરિ કર્મપ્રત્યયઃ । તેનૈવાધિષ્ઠિતા સતી પુરા પુરુષાર્થં ભોગ્યમ્ । સ્તૂયતે પ્રસ્તુતવતી । કર્મકર્તા । પુરિ લુઙ્ચાસ્મ ઇતિ ભૂતેઽનદ્યતને લટ્ ॥ ૩॥ ૪ ॥

ભોગ્યવસ્તુજનકત્વેન માયાં ધેન્વા રૂપયતિ–
ગૌરનાદવતી સા તુ જનિત્રી ભૂતભાવિની ।
અસિતા સિતરક્તા ચ સર્વકામદુઘા વિભોઃ ॥ ૫॥

ગૌરિતિ । ઇયં ગૌર્દોગ્ધ્રીશ્વરવાહનાનડુદ્વત્સા ચેત્કિં હમ્બારં કરોતિ નેત્યાહ–
અનાદવતીતિ । નાદરહિતાઽચેતનત્વાદ્વક્તુમસમર્થેશ્વરાધીનેત્યર્થઃ । યદ્વા ગૌરી શુક્લા સત્ત્વપ્રધાના સતી નાદવતી વેદપ્રવર્તિકા । પુંવદ્ભાવઃ । સર્વસ્ય । “ગૌરં શુક્લેઽરુણેઽપિ ચ?” ઇતિ વિશ્વઃ । અસિતા તામસી । સિતા ચાસૌ રક્તા ચ સિતરક્તા સાત્ત્વિકી રાજસી ચેત્યર્થઃ । વિભોરીશ્વરસ્ય । સર્વકામદુઘા સર્વાન્કામાન્દોગ્ધિ યથેષ્ટકાર્યકારિણી । મહાનારાયણીયે શ્વેતાશ્વતરે ચાસ્યાશ્છાગીસામ્યમુક્તમ્– “અજામેકાં લોહિતશુક્લકૃષ્ણાં વહ્વીઃ પ્રજાઃ સૃજમાનાં (જનયન્તીં) સરૂપાઃ । અજો હ્યેકો જુષમાણોઽનુ શેતે જહાત્યેનાં ભુક્તભોગામજોઽન્યઃ” ઇતિ ॥ ૫॥

ઇતિ પ્રથમઃ ખણ્ડઃ ॥ ૧॥

જીવાનાં બહુત્વં ભોક્તૃત્વમીશ્વરસ્યૈકત્વં પ્રયોજકત્વં ચાઽઽહ–

પિબન્તે નામવિષયમસઙ્ખ્યાતાઃ કુમારકાઃ । (પિબન્તિ)
એકસ્તુ પિબતે દેવઃ સ્વચ્છન્દેન વશાનુગઃ ॥ ૬॥

પિબન્ત ઇતિ । નામ શબ્દો વિષયોઽર્થઃ । છાન્દસત્વાત્કર્ત્રભિપ્રાયે ક્રિયાફલ આત્મનેપદમ્ । પ્રયોજકવ્યાપારઃ કર્ત્રભિપ્રાયં ક્રિયાફલમિતિ કૈયટઃ । વશા વન્ધ્યા તામનુગતઃ । પર્વતરાજપુત્ર્યા અપ્રકૃતત્વાત્ । યદ્વા વશાઃ સ્વવિધેયા અનુગાઃ પરિવારો યસ્ય વશાનુગઃ ॥ ૬॥

તર્હિ કિમસ્ય સર્વથા ભોક્તૃત્વં નેત્યાહ–
ધ્યાનક્રિયાભ્યાં ભગવાન્ભુઙ્ક્તેઽસૌ પ્રથમં પ્રભુઃ ।
ધ્યાનક્રિયાભ્યામિતિ । પ્રથમં ધ્યાયતિ ભગવાનિદમિતિ તતઃ પશ્યતિ સૈવ ક્રિયા તેન સ પ્રથમં ભુઙ્ક્તે તદુચ્છિષ્ટમન્યો ભુઙ્ક્તે । ધ્યાત્વાઽવલોકનમેવ તસ્ય ભોજનમ્ । "ન વૈ દેવા અશ્નન્તિ ન પિબન્ત્યેતદેવામૃતં દૃષ્ટ્વા તૃપ્યન્તિ" ઇતિ શ્રુતેઃ ।
ભુઙ્ક્ત ઇત્યુક્તે કાં ભુક્તે તત્રાઽઽહ–
સર્વસાધારણી દોગ્ધ્રીમિજ્યમાનાં સુયજ્વભિઃ ॥ ૭॥

સર્વેતિ । સર્વેષાં સાધારણીં સમભોગ્યામવ્યાકૃતરૂપામિત્યર્થઃ । "એકમસ્ય સાધારણં" ઇતિ શ્રુતેઃ । દોગ્ધ્રી તુ સ્વભક્ષમપેક્ષતેઽન્યથા દોહાસમ્ભવાજ્ઞાત આહ–ઇજ્યમાનાં સુયજ્વભિઃ । સાધુયાજ્ઞિકૈર્હવ્યકવ્યેન પૂજ્યમાનામ્ ॥ ૭॥

તર્હિ તેષામન્યાપેક્ષયા ફલવિશેષેણ ભાવ્યમિત્યપેક્ષાયામાહ–
પશ્યન્ત્યસ્યાં મહાત્માનં સુપર્ણં પિપ્પલાશનમ્ ।
ઉદાસીનં ધ્રુવં હંસં સ્નાતકાધ્વર્યવો હયેત્ ॥ ૮॥

પશ્યન્તીતિ । વૃક્ષસ્થાનીયમેકં દેહં ત્યક્ત્વા દેહાન્તરં ગચ્છતીતિ સુપર્ણોપમં સુપર્ણમ્ । પિપ્પલં કર્મફલમશ્નાતિ તં પિપ્પલાશનમ્ । વસ્તુવૃત્ત્યોદાસીનં સ્નાતકાધ્વર્યવો હવાદ્ધોમાત્પશ્યન્તીત્યન્વયઃ । આત્મદર્શનમેવ યાગાદિફલમ્ । વહેદિતિ પાઠે તાનિયં વહેન્નિર્વહેદ્યોગક્ષેમાદિનેતિ વ્યાખ્યેયમ્ । હવ ઇતિ પાઠે હવનકર્મણિ । હય ઇતિ પાઠે હયોઽશ્વસ્તદુપલક્ષિતેઽશ્વમેધકર્મણિ । હયેદિતિ પાઠે તાનિયં વર્ધયેત્ ॥ ૮॥

અધ્વર્યવફલમુક્ત્વા હૌત્રફલમાહ–
શંસન્તમનુશંસન્તિ બહ્વૃચાઃ શસ્ત્રકોવિદાઃ । (શાસ્ત્રકોવિદાઃ)
શંસન્તમિતિ । શસ્ત્રકોવિદાઃ । સપાદબન્ધો મન્ત્ર ઋક્ત્યા કેવલયા સ્તુતિઃ શસ્ત્ર ગીયમાનયા તયા સ્તુતિઃ સ્તોત્રમ્ । "ઋગ્ભિઃ શંસન્તિ યજુર્ભિર્યજન્તિ સામભિઃ સ્તુવન્તિ" ઇતિ યાસ્કવચનાત્ । શસ્ત્રે કોવિદાઃ કુશલાઃ । ફલં પૂર્વોક્તમેવાનુસન્ધેયં સર્વત્ર । સામગાનાં વ્યાપારમાહ-
રથન્તરે બૃહત્સામ્નિ સપ્તૈવૈતે ચ ગીયતે ॥ ૯॥

રથન્તર ઇતિ । રથન્તરે ગીયતે બૃહત્સામ્નિ ગીયતે । સામગૈર્દોગ્ધ્રીપતિરિતિ શેષઃ । કિં બહુના સપ્તૈવૈતે ચ સામભેદા ગાયન્તીતિ વિપરિણામઃ । રથન્તરં બૃહત્સામ વૈરૂપં વૈરાજં મહાનામ્ની રેવતી વામદેવ્યમિતિ સપ્ત સામાનિ । દોગ્ધ્રીપતિઃ ફલં પૂર્વોક્તં દદાતીતિ જ્ઞેયમ્ ॥ ૯॥

અથર્વણાં વ્યાપારમાહ–

મન્ત્રોપનિષદં બ્રહ્મ પદક્રમસમન્વિતમ્ ।
પઠન્તિ ભાર્ગવા હ્યેતદથર્વાણો ભૃગૂત્તમાઃ ॥ ૧૦॥ (પઠન્તે)

મન્ત્રેતિ । મન્ત્રાશ્ચોપનિષદં ચ મન્ત્રોપનિષદમ્ । ઉપનિષદશબ્દોઽકારાન્તો નપુંસકમસ્તિ । બ્રહ્મ બ્રાહ્મણં પઠન્તિ માયાપતિં ભજન્તીતિ ભાવઃ ॥ ૧૦॥

ઇતિ દ્વિતીયઃ ખણ્ડઃ ॥ ૨॥

ભાર્ગવગ્રન્થાનાં વિષયમીશ્વરમાહ–

બ્રહ્મચારી ચ વ્રાત્યશ્ચ સ્કમ્ભોઽથ પલિતસ્તથા ।
અનડ્વાલ્લોહિતોચ્છિષ્ટઃ પઠ્યતે ભૃગુવિસ્તરે ॥ ૧૧॥

કાલઃ પ્રાણશ્ચ ભગવાન્મન્યુઃ પુરુષ એવ ચ । (ભગવાન્મૃત્યુઃ)
શર્વો ભવશ્ચ રુદ્રશ્ચ શ્યાવાશ્વઃ સાસુરસ્તથા ॥ ૧૨॥

બ્રહ્મચારીત્યાદિસાર્ધદ્વાભ્યામ્ । બ્રહ્મચારિત્વવ્રાત્યત્વાભ્યાં સર્વવિરુદ્ધધર્મા અસ્મિન્નવિરુદ્ધા ઇત્યુક્તમ્ । સ્કમ્ભઃ સ્તમ્ભકઃ । સ્કમ્ભિઃ સ્તમ્ભે । વૃદ્ધઃ કુમારશ્ચેતિ વિરુદ્ધમ્ । અનડુત્ત્વં વાહ્યવાહકયોરકેત્વાત્ । લોહિતોચ્છિષ્ટ આર્દ્રગજચર્મપરિધાનત્વાત્ । કાલઃ સંહર્તૃત્વાત્ । પ્રાણો વાયુર્મૂર્તત્વાત્ । મન્યુસ્તમ ઉપાધિના । શર્વઃ । શૃ હિંસાયામ્ । ભવતિ પ્રભવતિ ભવઃ । રોદનાદ્રુદ્રઃ । શ્યાવા વિકૃતા અશ્વા ઇન્દ્રિયાણિ નેત્રાદીનિ યસ્ય । ત્રિનેત્રદશભુજાદિરૂપત્વાત્ । અસુરૈર્વાણાદિભિઃ સહિતઃ સાસુરઃ ॥ ૧૧॥ ૧૨ ॥

પ્રજાપતિર્વિરાટ્ચૈવ પાર્ષ્ણિઃ સલિલમેવ ચ ।
સ્તૂયતે મન્ત્રસંયુક્તૈરથર્વવિહિતૈર્વિભુઃ ।
તં ષાડ્વિંશકમિત્યેકે સપ્તવિંશં તથાઽપરે ॥ ૧૩॥

પુરુષં નિર્ગુણં સાઙ્ખ્યમથર્વાણં શિરો વિદુઃ ।
ચતુર્વિંશતિસઙ્ખ્યાકમવ્યક્તં વ્યક્તદર્શનમ્ ॥ ૧૪॥

પાર્ષ્ણિઃ પાદપૃષ્ઠં તત્તુલ્યઃ સંહારે લોકમર્દનાત્ । સલિલઃ સલિલવર્ણાઙ્ગદત્વાત્ । એવં વિંશતિવિશેષણો વિભુર્મન્ત્રબ્રાહ્મણાભ્યાં સ્તૂયતે । અથર્વવિહિતૈર્બ્રાહ્મણૈઃ । વિભુરીશ્વરઃ પરમાત્મા । ષડ્વિંશકં પૌરાણિકાઃ । સપ્તવિંશં તદ્ભેદા એવમ્ । "માત્રા ભૂતનીન્દ્રિયાણિ મનો બુદ્ધિરહઙ્કૃતિઃ । મહાન્પ્રધાનં તત્ત્વાનિ ષડ્વિંશઃ પરમેશ્વરઃ" ॥ ઇતિ ।

ચિત્તેન સાહિત્યે સપ્તવિંશ ઇતિ । સઙ્ખ્યાયતેઽનયેતિ સઙ્ખ્યા તત્સમ્બન્ધી સાઙ્ખ્યસ્તં જ્ઞાનગમ્યમિત્યર્થઃ ।

તદુક્તમ્– "મૂલપ્રકૃતિરવિકૃતિર્મહદાદ્યાઃ પ્રકૃતિવિકૃતયઃ સપ્ત ।
ષોડશકસ્તુ વિકારો ન પ્રકૃતિર્ન વિકૃતિઃ પુરુષઃ "॥ ઇતિ ।
સ્વયમવ્યક્તમપ્રત્યક્ષં વ્યક્તદર્શનં વ્યક્તસ્ય જગતો ભાસકમ્ । ૧૩॥ ૧૪ ॥

અદ્વૈતં દ્વૈતમિત્યેતત્ત્રિધા તં પઞ્ચધા તથા ॥ ૧૫॥

અદ્વૈતં વેદાન્તિનો દ્વૈતં કાણાદાસ્ત્રિધા ગુણભેદેન પઞ્ચધા ભૂતભેદેન "સ એકધા ભવતિ ત્રિધા ભવતિ પઞ્ચધા સપ્તધા નવધા પુનશ્ચૈકાદશઃ સ્મૃતઃ" ઇતિ શ્રુત્યન્તરાત્ ॥ ૧૫॥

ઇતિ તૃતીયઃ ખણ્ડઃ ॥ ૩॥

બ્રહ્માદ્યં સ્થાવરાન્તં ચ પશ્યન્તો જ્ઞાનચક્ષુષઃ ।
તમેકમેવ પશ્યન્તિ પરિશુદ્ધં વિભું દ્વિજાઃ ॥ ૧૬॥

દ્વિજાસ્ત્રૈવર્ણિકા વેદવિદઃ ॥ ૧૬॥

યસ્મિન્સર્વમિદં પ્રોતં બ્રહ્મ સ્થાવરજઙ્ગમમ્ ।
તસ્મિન્નેવ લયં યાન્તિ બુદ્બુદાઃ સાગરે યથા ॥ ૧૭॥

યસ્મિન્ભાવાઃ પ્રલીયન્તે લીનાસ્ચા વ્યક્તતાં યયુઃ ।
નશ્યન્તે વ્યક્તતાં ભૂયો જાયન્તે બુદ્બુદા ઇવ ।
ક્ષેત્રજ્ઞાધિષ્ઠિતં ચૈવ કારણૈર્વ્યઞ્જયેદ્બુધઃ ॥ ૧૮॥

બ્રહ્મેતિ । બ્રહ્મકાર્યં સ્થાવરાદિ યસ્મિન્પ્રોતં તમેકં બ્રહ્મૈવ પશ્યન્તીત્યન્વયઃ । લયં યાન્તિ સર્વે ભાવાઃ । લીનાસ્યા લીનમાસ્યં મુખં દ્વારમવિદ્યાલક્ષણં યેષાં તે તથોક્તાઃ સન્તો વ્યક્તતાં યયુર્ગતાઃ । પુનર્નશ્યન્તે નશ્યન્તિ । ભૂયશ્ચ વ્યક્તતાં જાયન્તે જનયન્તિ । અન્તર્ભાવિતણ્યર્થત્વાત્સકર્મકઃ । ગચ્છન્તિ વા । દ્વિઃ કથનં સૃષ્ટિપ્રલયયોરભ્યાસજ્ઞાપનાર્થમ્ । ક્ષેત્રજ્ઞેનાધિષ્ઠિતં શરીરમ્ । કારણૈરનુમિતકારણૈર્હેતુભિર્વિમતં ચેતનાધિષ્ઠિતં ક્રિયાવત્ત્વાદ્રથવદિત્યાદિભિઃ । વ્યઞ્જયેલ્લક્ષયેત્ । બુધઃ પણ્ડિતઃ ॥ ૧૭॥ ૧૮ ॥

ઇતિ ચતુર્થઃ ખણ્ડઃ ॥ ૪॥

એવં સહસ્રશો દેવં પર્યસ્યન્તં પુનઃ પુનઃ ॥ ૧૯॥

ય એવં શ્રાવયેચ્છ્રાદ્ધે બ્રાહ્મણો નિયતવ્રતઃ ।
અક્ષય્યમન્નપાનં ચ પિતૃણાં ચોપતિષ્ઠતે ॥ ૨૦॥

એવં સહસ્રશઃ પુનઃ પુનઃ પર્યસ્યન્તં દેવં જન્મમરણાદિપ્રબન્ધમાપદ્યમાનં જીવમ્ । ઈશ્વરારાધનેનોદ્ધરેદિતિ શેષઃ । વૈરાગ્યાર્થમિદમભિહિતમ્ । તસ્યાન્નં પાનં ચાક્ષય્યં ભવતિ । પિતૃણાં ચાક્ષય્યમેવોપતિષ્ઠતે ॥ ૧૯॥ ૨૦ ॥

બ્રહ્મ બ્રહ્મવિધાનં તુ યે વિદુર્બ્રાહ્મણાદયઃ ।
તે લયં યાન્તિ તત્રૈવ લીનાસ્યા બ્રહ્મશાયિને

લીનાસ્યા બ્રહ્મશાયિન ઇતિ ॥ ૨૧॥

ઇત્યથર્વવેદે ચૂલિકોપનિષત્સમાપ્તા ॥ ૧૩॥

બ્રહ્મ કૂટસ્થમ્ । બ્રહ્મવિધાનં તજ્જ્ઞાનોપાયમ્ । લીનાસ્યા લીનમાસ્યં મુખં પ્રવૃત્તિદ્વારં રાગાદિ યેષાં તે તથોક્તાઃ । કિમર્થં લીનાસ્યાઃ । બ્રહ્મશાયિને બ્રહ્મણિ શેતે તચ્છીલો બ્રહ્મશાયી ભાવપ્રધાનો નિર્દેશઃ । બ્રહ્મશાયિત્વાય બ્રહ્મણિ શયનં કર્તુમેકીભવિતુમિત્યર્થઃ । દ્વિરુક્તિઃ સમાપ્ત્યર્થા ॥ ૨૧॥

ઇતિ પઞ્ચમઃ ખણ્ડઃ ॥ ૫॥

નારાયણેન રચિતા શ્રુતિમાત્રોપજીવના ।
અસ્પષ્ટપદવાક્યાનાં દીપિકા ચૂલિકાભિધે ॥ ૧॥

ઇતિ નારાયણવિરચિતા ચૂલિકોપનિષદ્દીપિકા સમાપ્તા ॥ ૧૮॥

ૐ પૂર્ણમદઃ પૂર્ણમિદં પૂર્ણાત્પૂર્ણમુદચ્યતે ।
પૂર્ણસ્ય પૂર્ણમાદાય પૂર્ણમેવાવશિષ્યતે ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

Proofread by KS Sheshadri Sharma

*Chulikopanishad Dipika*

pdf was typeset on December 7, 2022

Please send corrections to *sanskrit@cheerful.com*